# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.C.2.3.5** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – २९/११/२०१६ सन्दर्भग्रन्थः – पञ्चलक्षणी

---

विभागः-१

प्रश्नः-१ द्वयोः व्याख्या विशदतया ददातु। (०८)

(१) पञ्चलक्षणसमासार्थं विचारयत।

(२) प्रथमलक्षणं समन्वयपूर्वकं दर्शयत।

(३) प्रथमलक्षणं कुतः परित्यक्तम्? "न तावदव्यभिचरितत्वम्" विवृणुत।

प्रश्नः-२ द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) पूर्वपक्षव्याप्तिस्वरूपं विवेचयत।

(२) व्याप्तिग्रहोपायान् व्याख्यात।

प्रश्नः-३ द्वयोः टिप्पणीं लिखत । (०४)

(१) व्याप्तिः। (२) अवृत्तित्वम्।

(३) अनुमानम्। (४) सामानाधिकरण्यम्।

प्रश्नः-४ पञ्चानाम् उत्तराणि एकैकवाक्येन लिखत। (०५)

(१) को नाम सपक्षः?

(२) लक्षणपञ्चकस्य को दोषः?

(३) व्यभिचारी नाम कः?

(४) केवलान्वयिहेतुर्नाम कः?

(५) वह्निमान् धूमादित्यत्र हेतुः कः?

(६) का अनुमितिः ?

(७) पूर्वपक्षव्याप्तेः प्रथमलक्षणं किम्?

विभागः-२

प्रश्नः-५ द्वयोः व्याख्या विशदतया ददातु। (०८)

(१) साध्याभाववत्तायां सम्बन्धविशेषं विचारयत।

(२) "अधिकरणभेदेन अभावभेदः भिद्यते न वे"ति चर्चां कृत्वा सिद्धान्तं स्थापयत।

(३) द्वितीयलक्षणे साध्याभावं परिष्कुरुत।

प्रश्नः-६ द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) प्रथमलक्षणत्यागे बीजमुद्भाव्य द्वितीयलक्षणसमन्वयं प्रतिपादयत।

(२) द्वितीयलक्षणे साध्यपदप्रयोजनं प्रदर्शयत।

प्रश्नः-७ द्वयोः टिप्पणी कार्या। (०४)

(१) साध्यादिभेदेन व्याप्तेर्भेदात्।

(२) द्वितीयलक्षणे समासविचारः।

(३) न तावदव्यभिचरितत्वम्।

प्रश्नः-८ पञ्चानाम् उत्तराणि एकैकवाक्येन लिखत। (०५)

(१) कपिसंयोगी एतद्वृक्षत्वात् इत्यत्र हेतुः?

(२) का नाम परीक्षा?

(३) पञ्चलक्षणानां अव्याप्तिः कुत्र?

(४) घटाभावाभावः किं स्वरूपः?

(५) हेत्वभावः कीदृशो बोध्यः?

(६) प्रत्येकं यावद्विपक्षावृत्तित्वं कस्य?

(७) संयोगस्यानधिकरणं किमुदाहृतम्?

विभागः-३

प्रश्नः-९ द्वयोः व्याख्या विशदतया ददातु। (०८)

(१) साध्यतदभाववति सम्बन्धविशेषणं विवेचयत।

(२) एतानि च न भेदकानि प्रसङ्गं निरूपयत।

(३) समनियताभावानामैक्यमिति प्रसङ्गं विचारयत।

प्रश्नः-१० द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) तृतीयलक्षणदलसार्थक्यं प्रतिपादयत।

(२) द्वितीयलक्षणत्यागे बीजं प्रदर्श्य समन्वयञ्च प्रतिपादयत।

प्रश्नः-११ द्वयोः समीचीनोत्तराणि ददातु। (०२)

(१) द्वितीयलक्षणं किम्?

(२) न तावदव्यभिचरितत्वमिति कस्य पङ्क्तिः?

(३) अधिकरणभेदेन अभावभेदमवलम्ब्य किं लक्षणं प्रवृत्तम्?

प्रश्नः-१२ द्वयोः समाधानि दत्त। (०२)

(१) समवायिकारणत्वं कस्य?

(२) धूमवान् वह्नेः इति सद्धेतुरासद्धेतुर्वा?

(३) चिन्तामणिकारस्य नाम किम्?

***

समाधानानि

कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.C.2.3.5** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – २९/११/२०१६ सन्दर्भग्रन्थः – पञ्चलक्षणी

प्रश्नः - ४

(१) निश्चितसाध्यवान् सपक्षः।

(२) केवलान्वयिनि अव्याप्तिः।

(३) साध्याभाववद्वृत्तिहेतुः व्यभिचारी।

(४) अत्यन्ताभावाप्रतियोगिहेतुः।

(५) धूमः।

(६) परामर्शजन्यं ज्ञानम् अनुमितिः।

(७) साध्याभावदवृत्तित्वम्।

प्रश्नः - ८

१. अव्याप्यवृत्तिहेतुः एतद्वृक्षत्वम्।

२. परमतनिराकरणपूर्वकस्वमतव्यवस्थापनम्।

३. केवलान्वयि हेतौ।

४. घटस्वरूपः।

५. प्रतियोगिव्यधिकरणो बोध्यः।

६. हेतोः।

७. गुणः।

प्रश्नः - ११

१. साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्।

२. चिन्तामणिकारस्य।

३. द्वितीयलक्षणम्।

प्रश्नः - १२

१. द्रव्यस्यैव।

२. असद्धेतुः।

३. श्री गङ्गेशोपाध्यायः।